## ऐषमोह्यःश्वसोऽन्यतरस्याम् । (१०५/१३२६)

ऐषमस् ह्यस् श्वस् इत्येतेभ्योऽन्यतरस्यां त्यप् प्रत्ययो भवति [1]शैषिकः । ऐषमस्त्यम्, ऐषमस्तनम् । ह्यस्त्यम्, ह्यस्तनम् । श्वस्त्यम्, श्वस्तनम् । 'श्वसस्तुट् च' (४.३.१५/१३८५) इति ठञपि तृतीयो भवति । शौवस्तिकम् ॥

## तीररूप्योत्तरपदादञ्ञौ । (१०६/१३२७)

तीरोत्तरपदात् रूप्योत्तरपदाच्च प्रातिपदिकाद् [2]यथासङ्ख्यम् अञ् ञ इत्येतौ प्रत्ययौ भवतः शैषिकौ । अणोऽपवादौ । [3]काकतीरम् । [4]पाल्वलतीरम् । रूप्योत्तरपदात् – [5]वार्करूप्यम् । [6]शैवरूप्यम् । तीररूप्यान्तात् इति नोक्तं [7]बहुच्प्रत्ययपूर्वाद् मा भूत् इति । [8]बाहुरूप्यम् । [9]अणेव भवति[10] ॥

## दिक्पूर्वपदादसञ्ज्ञायां ञः । (१०७/१३२८)

असञ्ज्ञायाम् इति प्रकृतिविशेषणम् । दिक्पूर्वपदात् प्रातिपदिकात् [11]असञ्ज्ञाविषयात् ञः प्रत्ययो भवति शैषिकः । [12]अणोऽपवादः । पौर्वशालः । [13]दाक्षिणशालः । [14]आपरशालः । असञ्ज्ञायाम् इति किम् ? [15]पूर्वेषुकामशमः । अपरेषुकामशमः । 'दिक्सङ्ख्ये सञ्ज्ञायाम्' (२.१.५०/७२७) इति समासः । प्राचां ग्रामनगराणाम् (७.३.१४/१४००) इति उत्तरपदवृद्धिः । पदग्रहणं स्वरूपविधि[16]निरासार्थम् ॥

## मद्रेभ्योऽञ् । (१०८/१३२९)

दिक्पूर्वपदात् इत्येव । दिक्पूर्वपदात् मद्रशब्दाद् अञ् प्रत्ययो भवति शैषिकः[17] । पौर्वमद्रः । आपरमद्रः । 'दिशोऽमद्राणाम्' (७.३.१३/१३९९) इति पर्युदासाद् आदिवृद्धिरेव ॥

## उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् । (१०९/१३३०)

[18]दिग्ग्रहणं निवृत्तम् । उदीच्यग्रामवाचिनः प्रातिपदिकाद् बह्वचोऽन्तोदात्ताद् अञ् प्रत्ययो भवति शैषिकः । अणोऽपवादः । शैवपुरम् । [19]माण्डवपुरम् । उदीच्यग्रामात् इति किम् ? [20]माथुरम् । बह्वचः इति किम् ? [21]ध्वजी । ध्वाजम् । अन्तोदात्तात् इति किम् ? [22]शार्करीधानम् । [23]शार्करीधानशब्दे लित्स्वरेण धानशब्द उदात्तः ॥

---

1. शैषिकः नास्ति फ. 2. यथासङ्ख्यम् नास्ति फ. 3. कर्कतीरम् फ. 4. नास्ति फ, पार्वतीरम् ह. 5. वार्य्यरूप्यम् ब. 6. नास्ति क. 7. बहुपूर्वात् ब.ह. 8. नास्ति फ. 9. अणेव भवति नास्ति ब. 10. स्वरे विशेषः इति इत्यधिकम् क.ह. 11. असंज्ञायां विषये ड. 12. अणोऽपवादः नास्ति फ. 13. नास्ति ह. 14. आवरशालः ह, नास्ति क. 15. पूर्वेषुकामशम्यां भवः इत्यधिकम् ह, पूर्वेषुकामशमः, अपरेषुकामशमः क, आपरेषुकामशमः ब, नास्ति ह. 16. नियमार्थम् क. 17. अणोऽपवादः इत्यधिकम् ह. 18. दिक्पूर्वपदग्रहणं फ. 19. नास्ति ड, माण्डवनगरम् ब.क, मगधनगरम् फ.ड. 20. माधुरम् ब.क.ड. 21. नास्ति फ. 22. शर्करीधानः फ, शाक्वरीधानम् क. 23. शार्करीधानशब्दे ब.ड.